# संस्कृतवार्ता:

दिनाङ्क :- 05/04/2025 सायम् - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

आदौ मुख्यवार्ताः

- भारत-श्रीलङ्का-देशौ रक्षोर्जा-व्यापारक्षेत्रेषु सामरिक-विकासात्मक-सहभागित्वस्य प्रोत्साहनाय सन्धिपत्रेषु हस्ताक्षराणि कृतवन्तौ।
- केन्द्रीयगृहमंत्री अमितशाहः पुनरुक्तवान् यत्, अग्रिमे वर्षे मार्च-मासान्ते छत्तीसगढ-राज्ये रक्तातंकवादस्य समाप्तिः भविष्यतीति।
- जम्मू-कश्मीर-प्रदेशे सीमासुरक्षाबलेन, जम्मू-अन्ताराष्ट्रियसीमायां, एकः पाकिस्तान देशीयः अवैध प्रवेशकः गोलिका-प्रहारेण मारितः ।
- वैश्विकार्थशास्त्रज्ञाः राष्ट्रपतिना ट्रम्प-इत्येतेन विहितस्य पारस्परिक शुल्कस्य अनन्तरं अमरीकायां आर्थिक-मन्दतायाः विषये प्रत्यादेशं प्रदत्त वन्तः ।
- म्यान्मार्-देशेन बाङ्ग्लादेशे अशीतिसहस्राधिकैकलक्ष-सङ्ख्यकाः रोहिंग्या-जनाः प्रत्यावर्तनाय योग्याः इति अभिख्यापितम्।
- लक्ष्यवेध-क्रीडायां भारतस्य सिफ्त कौर सामरा अर्जेण्टीना-देशे आयोजितायां आई. एस्. एस्. एफ्. विश्वचषक स्पर्धायां महिलानां पंचाशत् मीटर् राइफ़ल् थ्री-पोजिशन्-स्पर्धायां स्वर्णपदकं प्राप्तवती।

---

प्रधानमन्त्री -श्रीलङ्का

प्रधानमन्त्री नरेन्द्रमोदी अद्य कोलम्बोनगरे श्रीलङ्कादेशीयेन राष्ट्रपतिना अनुराकुमारदिसानायके इत्यमुना साकं द्विपक्षीयां वार्तां साधितवान्। सञ्जात-वार्तायाः प्रयोजनम् उभयोः देशयोः मध्ये कार्यनीतिक-विकासस्य सहभागित्वस्य चापि संवर्धनमिति वर्तते। उभयोः नेत्रोः उपस्थित्यां रक्षोर्जाम् समेत्य विविधक्षेत्रेषु अनेकेषु सन्धिपत्रेषु हस्ताक्षरणानि सञ्जातानि। संयुक्त-वार्ताहरः सम्मेलनं सम्बोधयता प्रधानमन्त्रिणा श्रीमोदिना प्रतिपादितं यत् राष्ट्रपतिः दिसानायके इत्येषः स्वप्रथमविदेशयात्रायै भारतस्य चयनं कृतवान्।

यद्धि उभयोः देशयोः मध्ये घनिष्ठान् विशिष्टान् सम्बन्धान् प्रदर्शयति। असौ प्रोक्तवान् यत् भारतस्य प्रतिवेशि-प्रथम-नीतिः क्षेत्रे च समेषां कृते सुरक्षा विकासश्च सागराभियाने श्रीलङ्कादेशस्य महत्वपूर्णम् स्थानं वर्तते ।

उभौ नेतारौ दीर्घकालादेव समागम्यमानेषु मत्स्यजीविनां प्रसङ्गेषु चर्चां सम्पादितवन्तौ तथा च मानवीयदृक्पातस्य महत्त्वेऽपि स्वसहमतिं प्रकटितवन्तौ।

अत्रावधौ श्रीमोदिना निगडने गृहीतानां मत्यस्यजीविनां शीघ्रविमुक्तये बलं प्रदत्तम्।

प्रधानमन्त्री सूचितवान् यत् विगतेषु षट् मासेषु भारतेन शतकोटि अमरीकीय – डॉलरपरिमितस्य राशिः श्रीलङ्कादेशाय अनुदाने प्रदत्तः। अनेन समुद्घोषितं यत् भारतेन द्विपक्षीय-ऋण-पुनर्निर्माण-सहभागितायाः अन्तर्गतम् ऋणमूल्यम् न्यूनीकर्तुंमपि निर्णयः निर्णीतः। येन हि् श्रीलङ्कावास्तव्यानां कृते तात्कालिक-रूपेण साहाय्यं मिलिष्यति। प्रधानमन्त्री नरेन्द्रमोदी कथितवान् यत् भारतं पूर्वीयप्रान्तस्य प्रगतये श्रीलङ्कादेशाय भूयोऽपि चत्वारिंशत्कोट्यधिकद्विअर्बुद-रूप्यकाणि दास्यति।

अत्रावसरे श्रीलङ्कादेशस्य राष्ट्रपतिः अनुराकुमारदिसानायके इत्यसौ प्रधानमन्त्रिणः मोदिनः सबकासाथ, सबका विकास, इत्येतस्य मन्त्रस्य प्रशंसां कुर्वन् एनं मन्त्रं प्रासङ्गिकं समयानुकूलं च उक्तवान्।

अवधेयं वर्तते यत् श्रीलङ्कादेशीयेन राष्ट्रपतिना अनुराकुमारदिसानायके इत्येतेन प्रधानमन्त्रिणे नरेन्द्रमोदिने मित्र-विभूषण-पुरस्कारेण सम्मानितः कृतः। प्रधानमन्त्री एतदनन्तरम् प्रोक्तवान् यत् इदं सम्मानं तस्यैव नास्ति अपितु चत्वारिंशदधिकैकशतकोटिसङ्ख्यकानां भारतीय जनानां सम्मानं विद्यते इति।

---------------------------------------------------------------

अमितशाहः

केन्द्रीयगृहमन्त्री अमितशाहः पुनरूद्घाटितवान् यत् आगामिवर्षस्य मार्समासान्तं यावत् छत्तीसगढराज्ये रक्तातङ्कवादस्य समाप्तिः भविष्यति। छत्तीसगढप्रवासावधौ बस्तरसम्भागस्य दन्तेवाडा क्षेत्रस्य बस्तर-पण्डुम इत्यस्य समापनसमारोहं भाषयन् गृहमन्त्री माओवादिनः शस्त्राणि निक्षिप्त्वा मुख्यधारायाम् प्रवेष्टुं प्रार्थयत्। असौ छत्तीसगढस्य जनजातीयकलायाः शिल्पकलायाः च प्रचारार्थं बस्तर-पाण्डुम् इत्यस्य प्रशंसाम् अकरोत्।

---------------------------------------------------------------

जम्मू-कश्मीर

जम्मू-कश्मीरे गतरात्रौ सुरक्षाबलैः अन्ताराष्ट्रीयसीमायां एकः पाकिस्तानी अवैधप्रवेशकः मारितः। अस्माकं जम्मूवार्ताहरैः संसूचितं यत् सीमासुरक्षाबलानां कार्याचरणे जम्मूराज्ये आर एस पुरा सेक्टर इत्यत्रैव अब्दुलियान सीमा

उपरक्षण क्षेत्रे अवैधप्रवेशकः पञ्चत्वे विलीनः। अस्याव्राजकस्याभिज्ञानं सम्प्रति प्रचलति सममेव लक्ष्यस्य च अन्वेषणकार्यं प्रचलति। सीमासुरक्षाबलस्य प्रवक्ता प्रोक्तं यत् एतां घटनामुद्दिश्य पाकिस्तानी रैंजर्स इत्यस्य साकं कटुविरोधः अङ्कितः ।

---

डॉनल्ड ट्रम्प

डॉनल्डट्रम्पप्रशासनद्वारा पारस्परिकशुल्कस्य प्रभावमुद्दिश्य वैश्विक ब्रोकरेज हाउस इत्यनेन अपि च अर्थशास्त्रविद्भिः अमरीकायाम् आर्थिकमन्दतागमनस्य सञ्चेतना प्रकटिता। जेपी मॉर्गन चेस एण्ड कंपनी इत्यस्य अनुमानं वर्तते यत् शुल्कभारस्य कारणात् वास्तविक-सकलगृहोत्पादेऽपि अपचितिः आयास्यति ।

---

म्यांमारदेशः

म्यांमारप्राधिकरणैः बाङ्ग्लादेशः दृढीकृतः यत् बाङ्ग्लादेशे आश्रयितानां अष्टलक्षसङ्ख्यकानां रोहिंग्याजनानां सूच्यां अशीतिसहस्राधिकैकलक्ष-सङ्ख्यकाः रोहिंग्याजनाः म्यांमारदेशम् प्रत्यागन्तुं योग्याः सन्नीति अभिज्ञातम्। बाङ्ग्लादेशस्य मुख्यपरामर्शकस्य मुहम्मद-यूनुस-इत्येतस्य वार्ताहरवक्तव्यम् अनुसृत्य विंशत्यधिक-अष्टदशाधिकद्विसहस्रतमवर्षयोः षड्वर्षाणां मध्ये इयं मूलसूची दत्तासीत्। वक्तव्ये उल्लिखितमस्ति यत् अन्येषां सप्तति-सहस्रं-रोहिंग्या-जनानां अन्तिमं सत्यापनं तेषां छायाचित्राणां नाम्नाम् च अतिरिक्तपरीक्षणस्य अनन्तरम् क्रियान्वितं भवतीति।

---

अश्विनी वैष्णव

रेलवे-सूचना-प्रसारणमन्त्री अश्विनीवैष्णवः अवोचत् यत् तमिलनाडोः रामेश्वरमस्थलम् आधुनिक-पंबनसेतोः उद्घाटनं देशाय ऐतिहासिकं क्षणं वर्तते। तेनोदीरितं यत् प्रधानमन्त्री श्रीनरेन्द्रमोदी श्वः अस्य सेतोः उद्घाटनं विधास्यति। अवधेयं वर्तते यत् अयं सेतुः सागरीयजले निर्मितः प्रथमः वर्टिकल-लिफ्ट-सेतुः वर्तते। यो हि प्राचीन तमिल-संस्कृतिः, सभ्यतां, तमिल-इतिहासं च प्रदर्शयति।

---

संस्कृत-साप्ताहिकी

प्रिया: श्रोतार:, संस्कृतजगता सम्बद्धै: विभिन्नै: क्रियाकलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ.एम.गोल्ड-प्रवाहिकात: रविवासरे मध्याह्ने सार्धैक-वादनत:भविष्यति। कृपया श्रृण्वन्तु।

------------------------------------------------------------

लक्ष्यवेध-क्रीडायां

लक्ष्यवेध-क्रीडायां भारतस्य सिफ्त कौर सामरा अर्जेण्टीना-देशे आयोजितायां आई. एस्. एस्. एफ्. विश्वचषक स्पर्धायां महिलानां पंचाशत् मीटर् राइफ़ल् थ्री-पोजिशन्-स्पर्धायां स्वर्णपदकं प्राप्तवती।

।। इति वार्ता:।।